व्याघ्रेयमस्त्रं संयोज्य शरे कस्मिंश्चिदीश्वरः ।
अनेन त्वां दहाम्यद्य यदि शक्तोऽसि वारय ॥”)

पृष्ठवाह्यः, पुं, ( पृष्ठे वाह्यं वहनीयद्रव्यमस्य । ) भारवाहकवृषः । तत्पर्य्यायः । स्थौरी २ पृष्ठ्यः ३ । इति हेमचन्द्रः । ४ । ३२६ ॥

पृष्ठशृङ्गः, पुं, ( पृष्ठे शृङ्गमस्य । शृङ्गस्य वक्रभावेन पृष्ठगमनात् तथात्वम् । ) वनच्छागः । इति हेमचन्द्रः । ४ । ३४४ ॥

पृष्ठशृङ्गी, [ न् ] पुं, ( पृष्ठे शृङ्गमिव अस्यास्तीति । शृङ्ग + इनिः । ) भीमसेनः । नपुंसकम् । महिषः । इति मेदिनीशब्दरत्नावल्यौ ॥

पृष्ठोदयः, पुं, ( पृष्ठेनोदयोऽस्य । ) मेषवृषकर्कटधनुर्म्मकरमीनलग्नाः । यथा, ज्योतिस्तत्त्वे ।
“अजो गोपतियुग्मञ्च कर्किधन्विमृगास्तथा ।
निशासंज्ञाः स्मृतास्त्वेते शेषाश्चान्ये दिनात्मकाः ॥
निशासंज्ञा विमिथुनाः स्मृताः पृष्ठोदयास्तथा ।
शेषाः शीर्षोदया ह्येते मीनश्चोभयसंज्ञकः ॥”

पृष्ठ्यं, क्ली, ( पृष्ठानां स्तोत्रविशेषाणां समूह इति । पृष्ठ + “ब्राह्मणमाणववाडवाद् यत् ।” ४ । २ । ४२ । इत्यस्य “पृष्ठादुपसंख्यानम् ।” इति वार्त्तिकोक्त्या यत् । ) पृष्ठानां समूहः । इत्यमरः । ३ । २ । ४२ ॥

पृष्ठ्यः, पुं, ( पृष्ठेन वहतीति । पृष्ठ + यत् । ) पृष्ठेन भारवाहकाश्वः । तत्पर्य्यायः । स्थौरी २ । इत्यमरः । २ । ८ । ४६ ॥ ( यथा, महाभारते । १ । २२२ । ४६ ।
“पृष्ठ्यानामपि चाश्वानां वाह्लिकानां जनार्द्दनः ।
ददौ शतसहस्राणि कन्याधनमनुत्तमम् ॥”
धारके, त्रि । यथा, ऋग्वेदे । ४ । ३ । १० ।
“ऋतेन हि ष्मा वृषभश्चिदक्तः
पुमाँ अग्निः पयसा पृष्ठ्येन ॥”
“पृष्ठ्येन धारकेण पयसाक्तः ।” इति तद्भाष्ये सायनः ॥ )

पृष्णिः, त्रि, ( पृश्निः । पृषोदरादित्वात् साधुः । ) प्रश्निः । इत्यमरटीकायां भरतः ॥ पार्ष्णिः । तत्र स्त्रीलिङ्गः । इत्युणादिकोषः ॥

पॄ, क पूर्त्तौ । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-सक०-सेट् । ) क, पारयति । इति दुर्गादासः ॥

पॄ, ल्पि गि लि पालने । पूर्त्तौ । इति कविकल्पद्रुमः ॥ ( क्र्या०-क्रा०च-पर०-उक०-सेट् । ) ल्पि, पूर्त्तोऽस्ति । स्वादयोदिदित्यत्र पॄवर्ज्जनान्न निष्ठातस्य नः । गि, पृणाति । क्तौ तु पूर्त्तिरित्येव मनीषादित्वान्न निः । लि, पिपर्त्ति । इति दुर्गादासः ॥

पेचकः, पुं, ( पचति पच्यते वा । पच + “पचिमच्योरिच ।” उणा० ५ । ३७ । इति वुन् । उपधाया अत इच । ) पक्षिविशेषः । पेँचा इति भाषा । तत्पर्य्यायः । उलूकः २ वायसारातिः ३ । इत्यमरः । २ । ५ । १५ ॥ शकाक्षः ४ दिवान्धः ५ वक्रनासिकः ६ हरिनेत्रः ७ दिवाभीतः ८ नखाशी ९ पीयुः १० घर्घरः ११ काकभीरुः १२ नक्तचारी १३ । इति त्रिकाण्डशेषः ॥ निशाचरः १४ कौशिकः १५ रूपनाशनः १६ पेचः १७ रक्तनासिकः १८ भीरुकः १९ । इति शब्दरत्नावली ॥ करिपुच्छमूलोपान्तः । गुदाच्छादकमांसपिण्डविशेषः । इत्यमरः । ३ । ३ । ६ ॥ पर्य्यङ्कः । यूकः । इति विश्वः ॥ मेघः । इति शब्दरत्नावली ॥

पेचकी, [ न् ] पुं, ( पेचकोऽस्यास्तीति । पेचक + इनिः । ) हस्ती । इति शब्दरत्नावली ॥

पेचिलः, पुं, ( पच + बाहुलकात् इलच् अत इच । ) हस्ती । इति त्रिकाण्डशेषः ॥

पेचु, स्त्री, ( पच्यते इति । पच + उन् । अत इत्वञ्च । ) पेचुली । इति त्रिकाण्डशेषः ॥

पेचुली, स्त्री, ( पच्यते इति । पच + उलच् । अत इत्वं गौरादित्वात् ङीष् । ) शाकभेदः । कचु इति ख्यातः । यथा,—
“कंचुकं पेचुली पेचु नाड़ीचो विश्वरोचनः ॥”
इति त्रिकाण्डशेषः ॥

पेटः, पुं, ( पेटतीति । पिट + अच् । ) प्रहस्तः । इति राजनिर्घण्टः ॥ पेटके, स्त्री । इत्यमरः । २ । १० । ३० ॥

पेटकः, पुं, ( पेटतीति । पिट + ण्वुल् । ) वंशवेत्रादिमयसमुद्गकप्रायः । पेटारी इति पेटी इति पेड़ा इति च ख्यातः । तत्पर्य्यायः । पिटकः २ पेड़ा ३ मञ्जूषा ४ । इत्यमरः । २ । १० । ३० ॥ आद्यौ स्वल्पपेटिकायाम् । परौ महापेटिकायामिति स्वामी ॥ समूहः । इति मेदिनी । के, ११७ ॥

पेटाकः, पुं, ( पेटक + पृषोदरादित्वात् साधुः । ) पेटकः । इति भरतद्विरूपकोषः ॥

पेटिका, स्त्री, ( पिटतीति । पिट + ण्वुल् । कापि अत इत्वम् । ) वृक्षविशेषः । पेटारि इति भाषा । तत्पर्य्यायः । कुबेराक्षी २ कुलिङ्गाक्षी ३ लघुदन्तिका ४ । इति रत्नमाला ॥ (यथा,—
“पेटिकामूललेपाच्च योनिर्भिन्ना प्रशाम्यति ॥”
इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापदधिकारे ॥ )

पेटी, त्रि, ( पेट + गौरादित्वात् ङीष् । ) पेटकः । इत्यमरः । २ । १० । ३० ॥

पेड़ा, स्त्री, ( पेटा । पृषोदरादित्वात् साधुः । ) मञ्जूषा । महापेटिका । इत्यमरभरतौ ॥

पेण, ऋ पेषे । गतौ । प्रैषे । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-प्रैषे अक०-सेट् । ) ऋ, अपिपेणत् । पिपेणतुः । इति दुर्गादासः ॥

पेत्वं, क्ली, ( पीयते इति । पा पाने + “अन्येभ्योऽपि दृश्यन्ते ।” उणा० ४ । १०५ । इति त्वन् । ) अमृतम् । घृतम् । इत्युणादिकोषः ॥ ( पुं, पतनशीलः पशुः । छागः । यथा, वाजसनेयसंहितायाम् । २९ । ५८ ।
“सावित्रो धारुणः छाग एकशितिपात् पेत्वः ॥”
“पेत्वः पतनशीलो वेगवान् पशुः ॥” इति तद्भाष्ये महीधरः ॥ तथाच ऋग्वेदे । ७ । १८ । १७ ।
“सिंह्यं चित् पेत्वेना जघान ॥”
“पेत्वेन छागेन जघान घातयामास ।” इति तद्भाष्ये सायनः ॥ )

पेयं, क्ली, ( पीयते यदिति । पा पाने + कर्म्मणि यत् । “ईद्यति ।” ६ । ४ । ६५ । इति आत ईत् ततो गुणः । ) जलम् । इति मेदिनी । ये, ३९ ॥ दुग्धम् । इति शब्दचन्द्रिका ॥ अष्टविधाशान्तर्गतान्नविशेषः । यथा,—
“भोज्यं पेयं तथा चूष्यं लेह्यं खाद्यञ्च चर्व्वणम् ।
निष्पेयञ्चैव भक्ष्यं स्यादन्नमष्टविधं स्मृतम् ॥”
इति राजनिर्घण्टः ॥
पातव्ये, त्रि । इति मेदिनी । ये, ३९ ॥ ( यथा, महाभारते । १४ । ४४ । १० ।
“सर्व्वेषां भक्ष्यभोज्यानामन्नं परमसुच्यते ।
द्रवाणाञ्चैव सर्व्वेषां पेयानामपि उत्तमाः ॥” )

पेया, स्त्री, (पीयते इति । पा + यत् । ततष्टाप् ।) सिक्थसमन्वितपेयद्रव्यम् । अस्या गुणाः ।
“पेया स्वेदाग्निजननी वातवर्चोऽनुलोमनी ।
क्षुत्तृड्ग्लानिदौर्ब्बल्यकुक्षिरोगविनाशिनी ॥”
इति राजवल्लभः ॥
मिश्रेया । इति शब्दचन्द्रिका ॥ श्राणा । अच्छमण्डम् । इति मेदिनी । ये, ३९ ॥

पेयूषः, पुं, क्ली, ( पीय पाने + “पीयेरूषन् ।” उणा० ४ । ७६ । इति ऊषन् बहुलवचनात् गुणः । ) अभिनवं पयः । इत्यमरः ॥ नवप्रसूताया गोः सप्तदिनाभ्यन्तरीणदुग्धम् । यथा,
“आसप्तरात्रप्रभवं क्षीरं पेयूष उच्यते ॥”
इति हारावली ॥
“पीयते पेयूषः पीङ् पाने नाम्नीति यूषः मूर्द्धन्यान्तः क्लीवञ्च । पीयूषश्च अथ पीयूषपेयूषे नवं सप्तदीनावधीति शब्दार्णवः ॥” इति तट्टीकायां भरतः ॥ ( यथा, मनुः ।५ । ६ ।
“शेलुं गव्यञ्च पेयूषं प्रयत्नेन विवर्ज्जयेत् ॥”)
अमृतम् । अभिनवसर्पिः । इत्युणादिकोषः ॥

पेरुः, पुं, ( पीयते रसानिति । पीङ् पाने + “मिपीभ्यां रुः ।” उणा० ४ । १०१ । इति रुः । ) वह्निः । सूर्य्यः । इत्युणादिकोषः ॥ समुद्रः । इति त्रिकाण्डशेषः ॥ ( त्रि, रक्षकः । यथा, ऋग्वेदे । ६ । ७४ । ४ ।
“नरो हितमवमेहन्ति पेरवः ॥”
“नरो नेतारः पेरवः । पा रक्षणे । मापोरिति रुरिति रुप्रत्ययः । सर्व्वस्य रक्षकाः ।” इति तद्भाष्ये सायनः ॥ पूरकः । यथा, ऋग्वेदे । ५ । ८४ । २ ।
“प्र या वाजं न हेषन्तं पेरुमस्यस्यर्ज्जुनि ॥”)

पेरोजं, क्ली, उपरत्नविशेषः । पीरोजा इति यवनभाषा । तत्पर्य्यायः । हरिताश्मम् २ पेरजम् ३ । तद्विविधम् । भस्माङ्गं हरितञ्च । तस्य गुणाः ।
“पेरजं सुकषायं स्यान्मधुरं दीपनं परम् ।
स्थावरं जङ्गमञ्चैव संयोगाच्च यथा विषम् ॥
तत् सर्व्वं नाशयेत् शीघ्रं शूलभूतादिदोषजम् ॥”